नामांक Roll No.

Sl.No. :

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 22

No. of Printed Pages – 07

VU–87–Sahit. Shas. (Supp.)

# वरिष्ठ उपाध्याय पूरक परीक्षा, 2024

# VARISHTHA UPADHYAYA SUPPLEMENTARY EXAMINATION, 2024

## साहित्य – शास्त्रम्

**समय** : 3 **घण्टे** 15 **मिनिट**

**पूर्णांक** : 80

**परीक्षार्थिभ्यः सामान्य निर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः।

2) **सर्वे** प्रश्नाः समाधेयाः।

3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।

4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्रैव लेखनीयानि।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

## खण्ड–अ

**1)** वस्तुनिष्ठप्रश्ना: **[15×1=15]**

i) 'उपमानोपमेययो: चेत् विशेष:स्यात्' इत्यत्र अलंकारो भवति – **[1]**

अ) निदर्शना    ब) व्यतिरेक:

स) सहोक्ति:    द) दृष्टान्त:

ii) विधौ व्यक्ते सति, निषेधे च अस्फुटे सति अलंकारो भवति – **[1]**

अ) गूढाक्षेप:    ब) आक्षेप:

स) व्याजस्तुति:    द) पर्यायोक्ति:

iii) कारणे सति कार्यस्य अनुत्पत्ति: भवति – **[1]**

अ) विभावना    ब) विरोधाभास:

स) विषमम्    द) विशेषोक्ति:

iv) आलस्येर्ष्याजुगुप्साख्या: संचारिभावा वर्ज्या भवन्ति – **[1]**

अ) हास्यरसे    ब) रौद्ररसे

स) श्रृंगाररसे    द) करूणरसे

v) रीतय: भवन्ति – **[1]**

अ) पञ्च    ब) षड्

स) सप्त    द) अष्ट

vi) अद्भुतरसस्य स्थायिभाव: अस्ति – **[1]**

अ) जुगुप्सा    ब) भय:

स) उत्साह:    द) विस्मय:

vii) संचारिभावा:/व्यभिचारिभावा: सन्ति – **[1]**

अ) नव    ब) त्रयस्त्रिंशद्

स) एकादश    द) पञ्च

viii) 'कान्ते त्वदाननरूचा ग्लानिमेति सरोरूहम्' इत्यत्र गुणीभूतव्यङ्ग्यम् अस्ति – [1]

अ) तुल्यप्राधान्यम्　　ब) सन्दिग्धम्

स) अस्फुटम्　　द) वाच्यसिद्धयङ्गम्

ix) स्वाङ्कुरित–व्यङ्ग्यस्यभेदाः सन्ति – [1]

अ) त्रयः　　ब) पञ्च

स) द्वौ　　द) सप्त

x) चन्द्रालोके लक्षणा कस्मिन् मयूखे वर्णिता – [1]

अ) पञ्चमे मयूखे　　ब) दशमे मयूखे

स) अष्टमे मयूखे　　द) नवमे मयूखे

xi) मुख्यार्थः संकेतितार्थः वा बोध्यते – [1]

अ) लक्षणा–द्वारा　　ब) अभिधा–द्वारा

स) व्यञ्जना–द्वारा　　द) तात्पर्या–द्वारा

xii) मेघदूत खण्डकाव्ये नायकः वर्तते – [1]

अ) कालिदासः　　ब) मेघः

स) कुबेरः　　द) यक्षः

xiii) रन्तिदेवस्य कीर्तिरूपा नदी अस्ति – [1]

अ) निर्विन्ध्या　　ब) शिप्रा

स) चर्मण्वती　　द) गोदावरी

xiv) शम्भोः केशग्रहणम् अकरोत् – [1]

अ) जह्नोः कन्या　　ब) अलका

स) सगरतनया　　द) देवाङ्गनाः

xv) दशरथस्य प्रथमपत्नी अस्ति – [1]

अ) कौशल्या　　ब) कैकेयी

स) सुमित्रा　　द) नटी

**2)** रिक्तस्थानानि पूरयत – **[7×1=7]**

i) यस्मिन्विशेषसामान्यविशेषाः सः .................। **[1]**

ii) मुञ्च मानं दिनं ................ मन्द नन्दी हरान्तिके। **[1]**

iii) अन्यथा तु गुणीभूतव्यङ्ग्यमापतितं ..................। **[1]**

iv) सरस्यामीलदम्भोजे चक्रः .................. विलोकयते। **[1]**

v) प्रीतः प्रीतिप्रमुखवचनं ................... व्याजहार। **[1]**

vi) प्रतिमानाटकस्य प्रतिनायकः लंकाधिपः .............. आसीत्। **[1]**

vii) मुदिता नरेन्द्रभवने .................. प्रतिहार रक्षीव। **[1]**

**3)** अतिलघूत्तरात्मकाः प्रश्नाः **[10×1=10]**

i) प्रस्तुते चेत् अप्रस्तुतस्य परिस्फूर्तिः कस्मिन् अलंकारे भवति? **[1]**

ii) कस्यां वृत्यां लकारः अन्यवर्णैः सह असंयुक्तः भवति? **[1]**

iii) वक्तृस्यूत–व्यङ्ग्यस्य कति भेदाः सन्ति? **[1]**

iv) व्यञ्जनात्मकः व्यापारो कीदृशः? **[1]**

v) प्रयोजनभेदेन लक्षणा कतिधा? **[1]**

vi) केन सह युद्धं कुर्वन् जटायुः वीरगतिं प्राप्नोति? **[1]**

vii) दशरथस्य अमात्यः सारथिश्च कः अस्ति? **[1]**

viii) कस्य प्रतिमां दृष्ट्वाभरतः मोहमुपगच्छति? **[1]**

ix) प्रतिमा नाटकस्य रचयिता कः? **[1]**

x) प्रियेषु विभ्रमः कासामाद्यं प्रणयक्चनम् अस्ति? **[1]**

## खण्ड–ब

लघूत्तरात्मकाः प्रश्नाः [12×2=24]

4) 'मेधां बुधः सुधामिन्दुर्बिभर्त्ति वसुधां भवान्' इत्यत्र कोऽलंकारः? [2]

5) 'या दातुः सौम्यता सेयं सुधांशोरकलंकता' इत्यत्र अलंकारं प्रदर्श्य तत्लक्षणमीप लिखत। [2]

6) हास्यरसस्य स्वरूपं लिखत। [2]

7) अपराङ्गगुणीभूतव्यङ्ग्यं निरूपयत। [2]

8) अभिधावृत्तेः भेदानाम् उदाहरणानि लिखत। [2]

9) 'कामाऽऽर्ता हि प्रकृतिकृपणाश्चेतना चेतनेषु।' इति सूक्तेः भावार्थो लेख्यः। [2]

10) महाकवि कालिदासस्य जीवनपरिचयः संक्षेपेण लिखत। [2]

11) रामगिरिपर्वतस्य महत्त्वं प्रतिपादनीयम्। [2]

12) उदयनकथाकोविदग्रामवृद्धाः कुत्र वसन्ति। [2]

13) स्वः पुत्रः कुरूते पितुर्यदि वचः कस्तत्र भोः! विस्मयः इति सूक्तेः भावार्थो लेख्यः। [2]

14) 'सूर्यः पतन्निव च मण्डलमात्रलक्ष्यः।' इत्यत्र छन्दः परिचीय तल्लक्षणं लेखनीयम्। [2]

15) 'सुतं ज्येष्ठं च त्वं व्रज वनमिति प्रेषितवती' इत्यत्र गणचिन्हनानि योजयित्वा छन्दो नाम लेखनीयम्। [2]

## खण्ड–स

16) अधोलिखितयोः कारिकयोः एकस्याः कारिकायाः व्याख्या लेखनीया। [3]

क) अभीष्टविप्रयोगाश्रुपातग्लान्यादिभिः क्रमात्।
विभावाद्यैर्युतः शोकस्थायी स्यात् करूणोरसः।।

ख) सर्वसाधारणप्रेमप्रश्रयादिस्वरूपया।
अनौचित्या रसाभासा भावाभासाश्च कीर्तिताः।।

17) अधोलिखितयोः कारिकयोः एकस्याः कारिकायाः व्याख्या लेखनीया। [3]

क) स्फुटास्फुटप्रभेदेन प्रयोजनमपि द्विधा।
विदुः स्फुटं तटस्थत्वादर्थगत्वाद् द्विधा बुधाः।।

ख) शब्दे पदार्थे वाक्यार्थे संख्यायांकारके तथा।
लिङ्गे चेयमलंकाराऽङ्कु रबीजतया स्थिता।।

18) अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसंङ्ग–भावार्थो लेखनीयः। [1+2=3]

क) तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः।
आषाढस्य प्रथम दिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगज प्रेक्षणीयं ददर्श।।

ख) हित्वा हालामभिमतरसां रेवतीलोचनाऽङ्का,
बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे।
कृत्वा तासामभिगममपां सौम्य! सारस्वतीना –
मन्तः गुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः।।

19) महाकविभासप्रणीतस्य प्रतिमानाटकस्य द्वितीयांकस्य कथासारोः लेखनीयः। [3]

अथवा

समस्य चरित्रचित्रणं लेखनीयम्।

## खण्ड–द

20) अधोलिखितयोः कारिकयोः एकस्याः कारिकायाः व्याख्या लेखनीया। [4]

क) वृत्तिभेदैस्त्रिभिर्युक्ता स्रोतोभिरिव जाह्नवी।
भारती भाति गम्भीरा कुटिला सरला क्वचित्।।

ख) वक्तृस्यूतं बोधयितुं व्यङ्ग्यं वक्तुरभीटिसतम्।
स्वाङ्कुरितमतद्रूपं स्वयमुल्लसितं गिरः।।

21) अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसंङ्ग–व्याख्या लेखनीया। [1+3=4]

क) प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम्।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार।।

ख) आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः।
वक्ष्यस्यध्वश्रमविनयने तस्य श्रृंगे निषण्णः
शोभां शुभ्रत्रिनयनवृषोत्खातपंकोपमेयाम्।।

22) अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसंङ्ग–व्याख्या लेखनीया। [1+3=4]

क) यदि न सहसे राज्ञो मोहं धनुः स्पृश मा दया
स्वजननिभृतः सर्वोऽप्येवं मृदुः परिभूयते।
अथ न रूचितं मुञ्च त्वं मामहं कृतनिश्चयो
युवतिरहितं लोकं कर्तुं यतश्छलिता वयम्।।

ख) द्रुमाः धावन्तीव द्रुतरथगतिक्षीणविषया
नदीवोद्वृत्ताम्बुर्निपतति मही नेमिविवरे।
अरव्यक्तिर्नष्टा स्थितमिव जवाच्चक्रवलयं
रजश्चाश्वोद्धूतं पतति पुरतो नानुपतति।।

☯☯☯☯

DO NOT WRITE ANYTHING HERE